
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

अथ शृंगारशतकं भर्तृहरिकृतं लिख्यते

Acc. NO. ~~1822~~ M-1729

Title - शृंगार शतक.

Author - भर्तृहरि.

Date - संवत् 1548

Subject - Poetry.

folio - 38

Xerox - 76

1

भ॰ शृं॰ गा॰
१

श्रीगणेशाय नमः अथ शृंगारशतं नाम्नापरं तु सम्यग्विचारितं
चेत्परिणामे वैराग्यमेवास्ति निंदा स्तुति निंदा वादिः प्रकारोस्ति अ
त्रतावत्स्तुति निंदाप्रकारः स्त्रीणां शृंगारश्च नश्वरः एतयोः प्रका
शात्पत्सुखं तत्रश्वरं परिणामे दुःखमेव एवं सति विषयिभिः कामि
भिः अविचार्य बहुतरं स्तूयते सा स्तुति रादौ विलिखति श्लोक शं
भुः स्वयंभुहरयो हरिणेक्षणानां येना क्रियंत सततं गृहकर्मदासाः
वाचामगोचरचरित्र विचित्रिताय तस्मै नमो भगवते कुसुमायुधाय
१ अस्यार्थः शंभुः शिवः स्वयंभूर्ब्रह्मा हरिर्विष्णुः एते महांतईश्व

१

राः येन मदनेन सततं निरंतरं एद्दकर्मदासाः कृताः तस्मै कुसुमायुधा
य नमोस्तु कथंभूताय वाचामगोचराणि चरित्राणि तैर्विचित्रिताय नाना
प्रकाराय तत्रादौ स्त्रीप्रशंसा १ स्मितेन भावेन च लज्जया भिया प
राङ्मुखैरर्द्धकटाक्षवीक्षणैः वचोभिरीर्षाकलहेन लीलया समस्त
भावैः खलु बंधनं स्त्रियः २ स्मितेन हास्येन चित्ताभिप्रायेण लज्जया
भिया भयेन पराङ्मुखैरर्द्धनिकटाक्षेणावीक्षितानि नेत्रांतैः वचोभिः
परोत्कर्षासहिष्णु गार्ई ईर्षा या कलहेन लीलया चरणभिः समस्तभावैः खलु
मिथ्यत्रयेन स्त्रियः बंधनं भवति २ भ्रूचातुर्यात्कुंचिताक्षाः कटाक्षाः स्निग्धा

भ॰ शृं॰ गा॰
२

वाचो लज्जिताश्चैवाहासाः लीलामंदप्रस्थितं च स्थितं च स्त्रीणामेतत्
भूषणं चायुधं च २ भ्रुवोर्यच्चातुर्यं तेन आकुंचितानि अर्द्धानि
नेत्राणि येषु एवं भूताः कटाक्षाः स्निग्धाः स्नेहयुक्ता वाचः लज्जयाल
ज्जायुक्ता हासाः लीलया स्वभावेन मंदं शनैः प्रस्थितं प्रयाणं स्थितं च
स्त्रीणां एते पदार्थाः भूषणमायुधं च भवति ३ क्वचित्सुभ्रूभंगैः क्व
चिदपि च लज्जापरिणतैः क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसि
तैः नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः स्फुरन्नीलाब्जानां प्रकरपरि
पूर्णाइव दिशः ४ प्रर्यंतमोमो जातोयासां ताः नवोढास्तासां नवोढानां २

भ॰ १ ग॰ १

वदनान्येव कमलानि तैः नेत्रचलितैः नेत्राणि चलितानि चंचलानि येषु तैः स्फुरन्ती लाली नाम प्रकारः समुदायस्तेन परिपूर्णा इव दृष्टयो भवंति व
दनानि कमलानि तेषु नेत्रचलितानि त एव भ्रमरास्तैः पूर्णानि दृश्यंते कथं
भूतैर्वदनैः क्वचित्सुभ्रु भंगैः सुष्ठु भ्रुवो भंगाः स्खलनानि येषु तैः क्वचित्स्वेच्छया वि
लसितैः शोभितैर्वदनैः ४ वक्त्रं चंद्रविकाशि पंकजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलकैलिनीजिष्णुः कचानां चयः । वक्षोजाविभकुंभसंभ्रमहरौ गुर्वी नितंबस्थली वाचां मार्दवमेव देव भ ५
वर्णः स्वर्णमपाकरिष्णुरेव तिसृ स्वाभाविकं मंडनं ५ वक्त्रं चंद्रविकासि चं
द्रवद्वर्तुलं शोभायमानं पंकजानां परिहासः विकसनं तद्वत् क्षमे लोचने वर्णः
कांतिः स्वर्णं सुवर्णं अपाकरिष्णुः स्वर्णतोधिकः कचानां केशानां चयः समुदा
लिनीजिष्णुः कचानां चयः ॥ वक्षोजाविभकुंभसंभ्रमहरौ गुर्वी नितंबस्थली वाचां मार्दवमेव देव भ ५

भ॰ शृं॰ गा॰
३

यः अलिनी भ्रमरी जिष्णुः जेता वक्षोजौ स्तनौ इभस्य गजस्य कुंभः गंड
स्थलं तस्य संभ्रमः शोभां हरौ कठिनो गुर्वीय युत्तानितंवस्थलीपश्चा
त्कटिप्रदेशः मार्दवं वाचां वचनानां सखारिथ्यंसंतं कोमलानि वचनानि
एते पदार्था युवतिषु स्वाभाविकं स्वभावेनैव मंडनं भवति ५ स्मितं कि
चिद्वक्रे सरलतरलो दृष्टिविभवः परिस्पंदो वाचामभिनवविलासोक्ति
सरसः गतीनामारंभः किसलयितलीलापरिकरः स्पृशंत्यास्तारुण्यं
किमिह न हि रम्यं मृगदृशः ६ तारुण्यं स्पृशंत्या मृगदृशः हरिणीदृ
शः किमपि किंचिदपि रम्यं न हि इति न रम्यमेवास्ति। तत्किं वक्रे किंचित् ३

स्मितमल्पहास्यं सरलो रुजुः तरलश्चंचलः दृष्टेर्विभवः सामर्थ्यं विला
सेन उक्तिः अभिनवा नूतना विलासोक्तिः तया सरसः मधुरः वाचां वच
नानां परिस्पंदः वक्तृव्यता गतीनां गमनानां आरंभः किसलयितलीलाप
रिकरः किसलयाः नव [illegible] पल्लवाः अत्यंतमृदवः तद्वन्मृ
दुः शनैः मृदुगमनमित्यर्थः रम्याः सुंदराः ६ दृष्टव्येषु किमुत्तमं मृग
दृशः प्रेमप्रसन्नं मुखं घ्रातव्येष्वपि किं तदास्यपवनः श्राव्येषु किं तद्वचः किं स्वा
द्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनुर्ध्येयं किं नवयौवनं सहृदयैः स
र्वत्र तद्विभ्रमः ७ सहृदयैः आसक्तचित्तैः दृष्टव्येषु किमुत्तमं द्रष्टव्यं मृग

दृशां प्रेम्णा प्रीत्या प्रसन्नं मुखं घ्रातव्येषु किमुत्तमं किं तदास्यपवनः श्रो
भ० श्टं० गा० ४
तव्येषु किमुत्तमं तद्वचः स्वाद्येषु किं ओष्ठपल्लवस्य रसः स्पृश्येषु किं त
स्यास्तनुः ध्येयं किं तस्याः नवयौवनं सर्वत्र सर्वदा विभ्रमः विलासः स्म
रणीयः ७ एताखलद्धृलय संहतिमेखलोत्थं झंकारिनूपुररवाद्धृत
राजहंस्यः कुर्वंति कस्य न मनो विवशं तरुण्यो विस्रस्तमुग्धहरिणीसदृशैः
कटाक्षैः ८ एतास्तरुण्यः कटाक्षैः कस्य मनः विवशं स्वाधीनं न कुर्व
न्ति कुर्वंत्येव कथंभूताः खला नि शब्दायमाना निर्लया नि मेखलाश्च
तत उत्थितझंकारः झणत्कारस्तेन सह एताः दृशा निमृपुरा स्तितेषां रवात्

च २ ४

प्राव्रात हृता जिता राजहंसो राजहंसानां स्त्रियः याभिस्ताः कथंभूतेः
कटाक्षैः वित्रस्ता भयभीता मुग्धा हरिणपत्नी सा यथा प्रे त्तवंगानि तत्सदृ
शैः ८ कुंकुमपंककलंकितदेहा गौरपयोधर लंबितहारा नूपुरहंसरण
त्पदपद्मा कं नवशीकु रुते भुवि रामा ८ कुंकुमस्य पंकः कर्दमः तेन
क[illegible]कितः देहो यस्याः सा गौरौ च तौ पयोधरौ स्तनौ ताभ्यां कंपितः हारो य
स्याः सा नूपुरा तेकरोतेव ९ नूनं हितेक विवरा विपरीत बोधा येनिस
मा दुरवला इति का[illegible]मिनीनां याभिर्विलोलतरतारकदृष्टिपातैः शक्रा
दयोपि विजितास्त्ववलाः कथं ताः १० तेक विवराः श्रेष्ठा नूनं निश्चये

भ॰ श्रृं॰ गा॰ नविपरीतबोध्याविपरीत [illegible] ज्ञाना: ये कामिनीनामबला इ
५ ति नित्यमाहु: वदंतियाभि: कामिनीभि: अतिशयेन विलोलतरा
स्तारकायेषु एवं भूतैर्दृष्टिपातै: प्रेक्षणै: शक्रादयोपि विजिता तु इति
निश्चयेन कथं ता अबला: प्रोक्ता: १० नूनमाज्ञाकरस्तस्या: सुभ्रुवो
मकरध्वज: यतस्तन्नेत्रसंचारस [illegible] तेषु प्रवर्त्तते ११ सप्तार्या: के
शा: संयमिन: श्रुतेरपि परं पारं गते [illegible] ने अंतर्वक्रमपि स्वभाव शुचि
भि: कीर्णे द्विजानां गणे: मुक्तानां सततापि वास रुचिरं वक्षोजकुंभद्व
यमित्यंतन्वि वपु: प्रशांतमते शोभं करोति सेवन: १२ केशा: संय मि ५

नः श्यावतावद्बालोचने श्रुतेः कर्णस्यापि परं पारं प्रांतं गते स्वभावे
नैव शुभिः शुद्धैः द्विजानां दंतानां गणैः अंतर्वक्त्र कीर्णव्याप्त मुक्ताफ
लानां सततमधिवासः वसतिस्तयारुचिरं शोभायमानं वक्त्रांभोजं स्त
नौ तावेव कुंभौ तयोर्द्वयं हेतस्त्विरइत्थ मुक्तभकरं ते तव वपुः प्रशांतमपि
नोस्माकं क्षोभं करोत्येव १२ मुग्धे ध्यानुसतां केयमपूर्वा त्वयि दृश्य
ते यथा विद्ध सि चेतां सि गुणेरेव न सायकैः १३ सति प्रदीपे सत्यग्नौ स
त्सु तारा रवीदुषु विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् १४ उ
नयोस्पष्टार्थः यद्वृत्तस्तन भारएष तरलेनेत्रे चले भ्रूलते रागांधेषु

भ·श्रृं·गा·
६

तदोष्टपल्लवमिदं कुर्वंतु नामव्यथां सौभाग्यपाचरपंक्तिरेव लिखि
तापुष्पायुधेन स्वयंमध्यस्यापि करोति तापमधिकं रोमावलीकेन
सा १५ हे कामिनि यद्यस्मात्कारणात्तव एषः वर्तुलस्तनभारः तर
लेचंचले नेत्रे चलेचंचले सुभ्रूलते इदमोष्टपल्लवं एतानित्तव
अस्माकं नाम इति निश्चयेन रागी इष्यात याश्रं धेपु व्यथां कुर्वंतु कु
तः पुष्पायुधेन मदनेन स्वयं तव भाले सौभाग्याक्षरपंक्तिरेव लिखि
ता कांतो अतोस्माकं किमपि न चलति परंतु इयं तवोदरे रोमावलीम
ध्यस्यापि तापं करोति तत्केन कारणेन तन्न ज्ञायते १५ गुरुणास्त ६

नभ्रारेण मुखचंद्रेण भास्वता शनैश्चरां भ्रांपाद्यां भ्रांरेजे गतइमपी

वसा १६ स्पष्टार्थः तस्यास्तनौ यदि घनौ जघनं विहारि वक्त्रं च चारु त

व चित्त किमाकुलत्वं पुण्यं कुरुष्व यदि तेषु तवास्ति वांछा पुण्यैर्विना न

हि भवंति समीहितार्थाः १० हे चित्त [illegible]ं तस्यास्तनौ घनौ कठि

नौ च जघनं च विहारि क्रीडायोग्यं तस्याश्च वक्त्रं चारु सुंदरं यदि तर्हि तव

व्याकुलत्वं किमर्थं यदि तव वांछास्ति तर्हि पुण्यं कुरुष्व समीहिता मी २

प्सितार्थाः पुण्यैर्विना न भवंति १७ मात्सर्यमुत्सार्य विचार्य कार्यमार्याः

समर्यादमिदं वदंतु सेव्या नितंबाः किमु भूधराणामुत स्मरस्मेरविलासि

भ·श·टी·
७

नीनां १८ भो आर्याः मात्सर्यमुत्सार्य तत्त्वा विचार्य च इदं समर्यादं का
र्यं वदंतु तत् किं यदि परमार्थं श्रेतु तर्हि भूधराणां नितंबाः सेव्याः नो चे
त्स्मरस्य मदनस्मेरः भरः तेन विलासिनीनां चितंबाः सेव्या इति १८
संसारेस्मिन्नसारे परिणतितरले द्वे गती पंडितानां तत्त्वज्ञानामृतांभः
पुलकितधियां यातु कालः कदाचित् नो चेन्मुग्धांगनानां स्तनजघन
भराभोगसंभोगिनीनां स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलोलोद्यता
नां १९ अस्मिन्संसारे पंडितानां द्वे गती कथंभूते संसारे पुनः कथं
भूते परिणतिः प्रांतस्तरले अस्थिसारे अत तत्त्वज्ञानमेवामृतोदकं

निःसारे०
७

तेनपुलकितास्तीरणाधीर्येषां एवंभूतः कालः कदाचित्स्यात्तुग

च्छतुः एकेयंगतिः नोचेत्तर्हिस्तनजघनयोर्भरस्तस्मिन्भोगसंगोया

सांमुग्धांगनानांस्थूलोपस्य स्थलीपुभूमिषुस्थगितः करतलस्पर्शः

तस्मिन्लोलोनांसतत्स्मानामुद्यतानातासांसंगेनकालोयातु इयंग

तिर्द्वितीया १७ मुखेनचंद्रकांतेनमहानीलैः शिरोरुहैः पाणिभ्यां

पद्मरागभ्यांरेजेरत्नमयीवसा २० संमोहयंतिमदयंतिविडंवयंतिनि

र्भर्त्सयंति [illegible] रमयंतिविषादयंतिएताः प्रविश्यसदयंहृदयेन

राणांकिंनामवामनयनानसमाचरंति २१ उभयोस्पष्टार्थः इतिस्त्री

म॰ प्राग॰
८

प्रसंसा अप्यभोगादित्यत्तरां विश्रम्य विश्रम्य वनद्रुमाणां छायासु त
न्वीविचचार काचित् स्तनोत्तरीयेण करोद्धृतेन निवारयती शशिनोम
यूखान् २१ काचित्तन्वी विरहिणी वनद्रुमाणांछायासु विश्रम्य विश्र
म्य विचचार स्तनोत्तरीयेण स्तनोपरिवस्त्रेण करोद्धृतेन शशिचंद्रस्य म
यूखान् किरणान् नूनिवारयंतीव २२ अदर्शने दर्शनमात्रकामा दृष्टौ
परिष्वंगरसैकलोला आलिंगितायापुनरायताक्षी मन्यामहे विप्रयो
योरभेदं २३ अदर्शने दर्शनमात्रस्य कामा दृष्टापरिष्वंगस्या साप दृष्ट्वा
दृष्टाचेत् परिष्वंगास्य आलिंगनस्य रसैकलोला सतृष्णा पुनः आलिंगि

८

तायामायताक्षांसस्तांपरस्परं विग्रहयोः केलयोर्भेदमाशास्महे माल
वद्यापुनः आलिंगितायामाताक्षांसस्तांपरस्परं विग्रहयोः कलहयोरभे
दमाशास्महे २३ मालतीशिरसिजंभणोन्मुखी चंदनंवपुषिकुंकुमा
विलं वक्षसिप्रियतमामनोहरा स्वर्गणपपरिशिष्ट आगतः २४ यस्य
मालतीपुष्पमालाशिरसिजंभाणोन्मुखीविकसनोयउन्मुखीविक
सितातयाचवपुषिचंदनंकुंकुमेनयुक्तं तयाचवक्षसि हृदयेप्रियतमा
शिरसिजंभणोन्मुखीविकसनायउन्मुखीविकसिता तयाचवपुषिचं
दनंकुंकुमेनयुक्तं तयाच वक्षसिहृदयेप्रियतमामनोहरावर्त्तते तस्यख

भ॰ श्रृं॰ गा॰
९

र्गभोगो मुक्तः अवसिष्टः उर्वरितएवोत्र आगतः अत्रापिस्वर्गभो
गोभवति २४ प्राङ्मामेतिमनागमानितगुरुांज्जाताभिलाषंततः स
व्रीडंतदनुश्लथीभूयतमनुप्रसत्त्वधैर्येपुनः प्रेमार्द्रस्पृहणीयनिर्भर
रहः क्रीडाप्रगल्भातयोनिः शंकांगविकर्षणाधिकसुखरम्यंकुलस्त्री
रतं २५ कुलस्त्रीरतंरम्यं कथंप्राकपूर्वमांप्रतिएविइतिमनागेकवा
रंअमानितगुरुां स्वयमेव आगमिष्यतिइतिकारणात आदरोनैव
कृतः ततः जाताभिलाषंइच्छाजातातततः सव्रीडंलज्जयासह आगता
तदनुश्लथीभूयतंशिथिलतयाउद्यता अत्रवक्ता अनुपश्चात प्रत्य

९

स्तधैर्यंत्यक्तं पुनः प्रेमणा आर्द्रः स्पृहणीयः निर्भरः आदरः तेन रहः ए
कांतक्रीडायां प्रगल्भात्यक्तलज्जा ततः निःशंकसंगविकर्षणेन अधि
कं सुखं एवं शनैः त्यक्तलज्जामिति कारणात् रम्यं २५ उरसि निपति
तानां स्रस्तधम्मिल्लकानां मुकुलितनयनानां किंचिदुन्मीलितानां सुर
तजनित[illegible] स्वेदस्वादुगंडस्थलीनाम् अधरमधु वधूनां भाग्यवंतः पिबंति
२६ स्पष्टार्थः आमिलितनयनानां यः सुरतरसोनुसंविदं कुरुते मिथु
नैर्मिथो वधारितम वितथमिदमेव कामनिवर्हणं २७ आईषत्मीलि
तनयनानां स्त्रीणां यः सुरतरसः अनुसंविदं सुखं कुरुते इदमेव कामस्य

भ·प्रं·गा· निवर्त्तीणकर्त्तव्यं मिथुनेद्वंद्वोर्नियः परस्परमवधारितं ज्ञातमन्यो

१०

न्यं जानाति २७ इदमनुचितमकमस्य पुंसायदिह जराखपि मन्म

था विकाराः तदपि च न कृतं नितंबिनी नास्तनपतनावधिजी[illegible]वि

तं रतं वा २८ पुंसायत्तस्मात् जराखपि मन्मथाः मदनस्य विकाराः कृ

ताः इदमनुचितं कृतमकमस्य कोपि नैव तदपि तथा च नितंबिनी

नांस्त्रीणां स्तपतनमेव अवधि जीवितं रतं वा न कृता इदमपि अनुचि

तं कृतं २८ एतत्कामफलं लोके यद् द्वयोरेकचित्तता अन्यचित्तकृते

कामे शवयोरिव संगमः २९ साम्प्रार्थः प्रणायमधुराः प्रेमोद्गाढरसाद

१०

त्नसास्तयाभणितिमधुरामुग्धप्रायाःप्रकाशितप्रमदाःप्रकृ
तिसुभगाविस्रंभार्द्राःस्मरोदंयदायिनोरहसिकिमपिस्वैरालापाह
रंतिमृगदृशां ३० मृगदृशांरहसिस्वैरंतथेच्छमालापाःवचनानि
किमपिअनिर्वचनानीयंसुखंकुर्वंति कथंभूताआलापाःप्रणयेन
प्रीतामधुराःप्रेम्णाउन्नाढःअतिशयरसदलसाःतथाभणातिरति
कुजितेमधुराःमुग्धप्रायाःअस्फुटाःप्रकाशितःप्रकर्षेणमदोयैस्ते
प्रकाशितप्रमदाःप्रकृत्यास्वभावेनसुभगाःसुंदराःविश्रंभार्द्राविश्वा
सयोग्याःस्मारस्यउदयंददातीतितेस्मरोदयदायिनः ३० आवासःक्रि

यतेगांगे पापहारिणि वारिणि स्तनमध्ये तरुण्या वा मनोहारिणि हारिणि ॥ २१ ॥ स्पष्टार्थः प्रियपुरतो युवतीनां तावत्पदमातनोतु हृदि मानः भवति न यावच्चंदनतरुसुरभिर्मधु निर्मलः पवनः ॥ २२ ॥ युवतीनां मानः अहंकारः तावत्पदं आतनोतु विस्तारयतु यावत् मधुतया [illegible]तोन भवति इति भोगाटिलक्षणं अथ ऋतुवर्णनं तत्रादौ वसंतः परि[illegible] स्कृतो वाताः शाखा नवांकुरकोटयो मधुरविरतोन कंठवाचः प्रियायाः पिकपक्षिणां विरलयुक्ताः वाता वायवः प्रकटिताः वृक्षाणां शाखाः पल्लवाः नवांकुरकोटयः नवांकुरयुक्ताः अभवन् पिकपक्षि

णां प्रियामधुविरतोत्कंठवाचः उच्चैरुत्कंठितमधुरवाचः अभव
न विरलाः स्वल्पाः सुरतरंभोगेन स्वेदस्तस्मात् उद्गमाः उद्गतस्वेदा
वधूवदने इव अभवन् एवं मधौ वसंते प्रसरति प्रकटिते सति अभ
त् तस्य मधोः राज्यांकस्य गुणोदयः मदनाविर्भावेन जातः भवत्ये
व ३३ मधुरसमधुरैरपि कोकिलाकलकलैर्मलयस्य च वायुभिः
विरहिणाः प्रणिहंति शरीरिणो विपदि हंति सुधापि विषायते ३४
अयं मधुर्वसंतः शरीरिणोपि विरहिणाः मधुरैरपि कोकिलाकलक
लैः तथा मलयस्य च वायुभिः प्रणिहंति मारयति ननु कोकिलाक

23

म॰शृं॰गा॰
१२

कलकलैः तथा मलयस्य च वायुभिः प्राणिहं तिमारयंति ननु
कोकिलाकलकलामधुरा तथा वायुरपि प्रियकरः एभिर्मा
रणं न घटति तर्हि घटत्येव कथं विपरिविपाकाले सुधाप्यमृत
मपि किं विषायते विषं भवंति २४ आवासः किं चिरेव दयिताप्रा
र्श्वे विलासालसः करोकोकिलकाकलीकलरवः स्मेरोलतामंडपः
गोष्ठीसत्कविभिः समं कतिपयैः सेव्याः शितांशोः कराः केषांचित्सुख
यंति नेत्रहृदये चैत्रे विचित्राः क्षपाः २५ आवासः वसतिः किलह
ति स्मर्यते विलासेन अलसः दयितापार्श्वे किं चिरेव स्मेरोप्रियो भव

तिकरौ कोकिलानां काकलीसूक्ष्मध्वनिः तथा कलरवगंभीरोरवः

तथा कलरवगंभीरोरवः शब्दः प्रियो भवति लतामंडपः प्रियो भवति क

तिपयैः सत्कविभिः सम गोष्ठी प्रिया भवति सितांशोः कराः किरणाः सेव्याः

भवंति एते राग्योः केषां चिन्नेत्रहृदये सुखयंति ये अप्रवासिनस्तेषां सुख

खयंति ये प्रवासिनस्तेषां दुःखरूपा भवंति एवं चैत्रमासस्तपाः निशा विवि

त्राभवंति ३५ पांथस्त्री विरहानलाहुतिकलामातन्वती मंजरी माकंदेषु पि

कांगनाभिमधुना सोत्कंठमालोक्यते अप्येते नव पाटलापरिमलाप्राग्भा

रपाटच्चरा वांति क्लांतिवितानतानवकृताः स्त्रीखंडशैलानिलाः ३६ अ

म॰ गं॰ गा॰ न्यत किं वसंते भवति का च वृक्षस्य मंजरी यां य स्य स्त्री तस्या विर

१३ ह एव अनलः अग्निस्तस्मिन्नाहुतिं कलां आतन्वती विस्तारयंती

एवं भूता मंजरी पिकांगनाभिः सोत्कंठमालोक्यते अपि अथ च श्री

खंड शैलानिलाम लयमारुताः प्राग्भारपटुस्वरा वांति कथंभूताः न

वाचासौ पाटला च तस्याः परिमला येषु ते पुनः क्रांतिक्रमानां वितानं स

मुदायं तस्य तानवं तनुतां कृतवंतः २६ सहकारकुसुमकेसरनिर्भरा

मोदमूर्छिता दिगंते मधुरमधुविधुरमधुपे मधौ भवेदुत्कंठा २७ मधौ

वसंते कस्य उत्कंठा न भवेत् कथंभूते मधौ सहकारस्य कुसुमानां केस १३

राशितेषां भरः समुदायः तस्य आमोदः गंधस्तेन मूर्छिता दिगंता यस्मि
न्पुनः मधुरः मधुपुष्पस्तः तस्मिन् विधुरा आसक्ताः मधुपा भ्रमरा य
स्मिन् ३५ अथ ग्रीष्मः अच्छाच्छचंदनरसार्द्रकरा मृगाक्षी धारागृहाणि
कुसुमानि च कौमुदी च मंदो मरुत्सुमनसः शुचिहर्म्यपृष्ठं ग्रीष्मे मदं च
मदनं च विवर्द्धयंती ३८ अच्छाच्छः शुद्धाच्छुद्धः चंदनरसः तेन च आर्द्रा क
राः यासां ता मृगाक्षः तथा च धारागृहाणि कुसुमानि च कौमुदी चंद्रकला
मंदो मरुत् वायुः सुमनसः लता हर्म्यपृष्ठं शुचिरातेपदार्थाः ग्रीष्मे मदं च
मदनं च वर्द्धयंति ३८ स्त्रजो हृद्यामोदा व्यजनपवनश्चंद्रकिरणाः रागः

म॰ श्टं॰ गा॰
१४

कासारी मलयजरसः सीधु विशदं शुचिः सौधोत्तंगः प्रतनु वसनं पंकज
दृशो निदाघात्तूर्णं तत सुखमुपलभंते सुकृतिनः ३५ स्रजः घः आमो
दोपरिमलो यासां ता व्यजनस्य पवनः श्चंद्रकिरणाः पारागः पुष्परजः
कासारः सरोवरं मलयजं चंदनं तस्य रजः सीधु मद्यं विशदं शुचि सौ
धं राजसदनस्य उत्तंग उपरिभागः प्रतनु कोमलं सूक्ष्मं वसनं पंकज
दृशः कमलनयनाः स्त्रियो एते षां पदार्थानां ग्रीष्मात सुखं तूर्णं शीघ्रं सु
कृतिनो लभंते ३५ सुधांशुर्नं धाम स्फुरदमलरश्मिः शशधरः प्रिया
वक्त्रांभोजं मलयजरजश्चाति सुरभिः स्रजो हृद्यामोदास्तदिदमखि १४

त्वरां गिशि जनेकरोत्यंतःक्षोभं नतु विषयसंसर्गविमुखे ४० सुधया
शुभ्रं धाम गृहं स्फुरंतः अमलारश्मयः किरणा यस्यासौ शशधरः स्फ्रं
द्रः प्रियावक्त्रांभोजं अतिसुरभिसुगंधं मलयजं रजः स्रजो माल्यानि
हर्म्यः आमोदो गंधो यासां तास्तविदमखिलं सर्वं शिशिरे जने एते पुष्प
दार्थेषु विषयेषु यस्य प्रीतिस्तस्मिन् जने अंतःक्षोभं करोति नतु विषय
संसर्गविमुखे जने क्षोभं करोति ४० अथ वर्षासमयः तरुणीवेषोद्दी
पितकामा विकसज्जातिपुष्पसुगंधिः उन्नतपीनपयोधरभारभ्राव
टकुरुते कस्य न हर्षं ४१ स्पष्टः वियदुपचितमेघं भूमयः कंदलिन्यो

म॰ सं॰गा॰
१५

नवकुटजकदंबामोदिनो गंधवाहा: शिखिकुलकलकेकारावरम्या वनांता: सुखिनं वासर्वमुत्कंठयंति ४१ वियतगगनमुपचिते षामामोदो गंधो येषु एवं भूता गंधवाहा: वायव: शिखिकुलस्य मयूरकुलस्य केकारावा: वाणीशब्दास्तै रम्या वनांता: वनप्रदेशा: एते प्रावृट्काले सुखिनम सुखिनं वा सर्वमुत्कंठयंति मदनाविर्भावेन उत्कंठितं कुर्वंति ४२ उपरिघनं घनपटलं तिरग्ग्यागिरयोपि नर्त्तितमयूरा: वसुधाकंदलधवलातुष्टिं पथिक: पातयतु ४३ कश्चन पथिरु: मार्गगच्छतिय स्य उपरिघनं निविडं घमानां पटलं तिर्यगवामप्रदेशेन नर्त्तितामयूरा ये

१५

षुते गिरयः वसुधाकंदलैः धवलाः एवं सति पथिकः विरहेसाकतु
ष्टिं संतोषं पातयतु माप्नोतु ४२ इतो विद्युद्वल्लीविलसितमितः केतकि
तरोः स्फुरद्गंधः प्रोद्यज्जलदनिनदस्फूर्जितमितः इन केकी क्रीडा
कलकलरवः पक्ष्मलदृशां कथंयास्यंते ते विरहदिवसाः संभृतरसाः
४४ इतः विद्युद्वल्ली विद्युल्लता इतः केतकितरोः स्फुरद्तीव्रगंधः इ
तः प्रकर्षेणाउद्यतजलदनिनदस्य मेघशब्दस्य स्फूर्जितं इतः केकी
नां मयूरीणां क्रीडासु कलरवगंभीरशब्दः एवं सति पक्ष्मलदृशां स्त्रीणां
संभृतरसार सवंतः विरहदिवसाः एते कथं यास्यंति गमिष्यंति ४४ अ

भ॰शृंगा॰ सूचीसंसारे तमसि नभसि प्रौढजलदध्वनिप्राप्ते स्मिन्पतति दृषदां नी
१६ रनिचयोऽद्य सौदामिन्याः कनककमनीयं विलसितं मुदं च ग्लानिं च
प्रथयति पथिष्वेव सुदृशां ४५ अ सूचीसंसारे न सूच्यते संसारो यस्मि
न्तमसि अंधकारे एवंभूते नभसि नभाः इपदमासे कयं भूते प्रौढाश्च
ते जलदाश्च ते जलदाश्च तेषां ध्वनिप्राप्ते दृषदां पाषाणानामुपरि नी
रनिचये पतति एवमिदं सौदामिन्या विद्युतो विलसितं स्फुरणं कनक
कमनीयं सुंदरं सुदृशां स्त्रीणां पथिष्वेव मुदं हर्षं च विरहिणां ग्लानिं
च म्लानतां च प्रथयति प्रकटीकरोति ४५ आसारेषु न हर्म्यतः प्रियत

क ३

१६

मैर्यातुं पदाशक्यते शीतोत्कंपनिमित्तमायतदृशा गाढं समालिंग्यते
जाताः शीतलशीकराश्च मरुतो वात्यंतखेदच्छिदो धन्यानां च तद्दुर्दिनं
सुदिनतां याति प्रियासंगमे ४८ अस्यार्थः मेघाच्छन्ने दुर्दिने दिनोदये
जातेपि सति प्रियतमे भर्तारि रैनिद्रारसो भर्तृभिः न त्यासारेणापर्जन्यधा
रया तदा वहिः हर्म्यतः गृहात् पातुं न शक्यते तदा शीतोत्कंपनिमित्तमाय
तदृशा विस्तीर्णनेत्रया स्त्रिया गाढम् अत्यंतं प्रिय आलिंग्यते अथ च मरु
तो वायवः शीतलशीकराः अंबुकणा जाताः खेदच्छिदो खेदनाशकावां
छति एवं धन्यानां प्रियासंगमे दुर्दिनमपि सुदिनतां याति सुखतरं भवति

मद निरतः शारदं सलिलं न पिबति ॥ ४६ ॥

म॰ शृं॰ गा॰ ४६ अथ शरत अर्द्धनीतासु निशायां सरभससुरतायासखिन्नश्लथांगः प्रोद्भूतासह्यतृष्णो मधुमद निरतो हर्म्यपृष्ठे विविक्ते संभोगक्लांतकांताशिथिलभुजलतातर्जितं कर्करीतो ज्योत्स्नाभिन्नाधरररसं पिबति न सलिलं शारदं मंदभाग्यः ४७ कश्चन पुरुषः कामी निशायां अर्द्धनीतायां सरभससुरते यः आयासः कष्टः तेन खिन्नः खेदं प्राप्तः अत एव श्लथांगः सन् हर्म्यपृष्ठे विविक्ते एकांते प्रकर्षेण उद्भूता असह्या तृष्णा तया मधुमंदभाग्यः कथंभूतम् अधररसं संभोगेन क्लांता कष्टी भूता कांता तस्याः शिथिलभुजलतया वर्जितं निषेधितं ४७ हेमंते दधिदुग्धसर्पिरसनामां

१७

१७

जिष्टवासो भृतः काश्मीरं इव सांद्रस्निग्धवपुषः खिन्ना विचित्रैर

तैः पीनोरस्थलकामिनीजनकृतांश्लेषा गृहाभ्यंतरं तांबूलीदलपू

गपूरितमुखा धन्या सुखं शेरते हेमंते ऋतौ [illegible]चित्पुरुषाद् घिवद्दुग्धं

च सर्पिः घृतं च एतानि चमसनं येषां तेमां जिष्टवास विभ्रति ते काश्मी

रं कुंकुमकेसरं तस्य इव रसः तेन सांद्रं निविडं स्निग्धमुद्वर्त्तनमेवं भू

तं वपुर्येषां ते विचित्रैः रतैः खिन्नाः खेदप्राप्ताः पीनं मांसलमुरस्थलं य

स्य एवं भूताः कामिनीजनस्तेन गृहाभ्यंतरे गृहमध्ये सुखं शेरते निद्रां कु

र्वंति ४८ अथ शिशिरः चुंबंतो गंडभित्तीरलकवति मुखे सीत्कृतान्या

भ॰श्रृं॰गा॰
१८

दधानावक्षस्सु कंचुकेषु स्तनभार पुलकोद्रेदमापादयंतः ऊरूनाकं
पयंतः घ. यूजघन तथा तस्सु यंतो शुकानि वृत्तं कांताजनानां विटवरि
तकृत: शैशिरावांसिवातः ४९ शिशिरेकामिनः भोगकालेयथाकुर्वं
तितथावायवोपिकुर्वंति [illegible] इतिश्लेषः अलकवतिके
शवतिमुखेगंडभित्तीश्चुंबंतः प्रवलावायवः मुखेकेशानिइतस्ततोनयं
तितेनैवमिषेणचुंवंति पुनः कथंसीत्कृतानि आरचाना शीतातिश
येनसर्वेतिसीत्कृतानिकुर्वंतितान्येववायुभिः कृतानि उत्कंचुकेषु वि
गतकंचुकेषु वक्षस्सु स्तनभोरेषु पुलकोद्रेदमापादयंतः ऊरूनाकं

१८

पयंतः पृथुजघनतटात् अंशुकानि स्रंसयंतः निःकाशयंतः एवं
कांताजनानां विटचरितं कृतः विटाः भांडा तेषां चरितमाचरितं कु
र्वंति ते शैशिरे भवा वाता वांति वहंति ४९ केशानाकलयन् दृशो
मुकुलयन् वासो बलादाक्षिपन् आतन्वन् पुलकोद्गमं प्रकटयन् आलिं
गनकंपं शनैः वारंवारमुदारसीत्कृतकृतो दंतच्छदात् पीडयन् प्रा
यः शैशिर एष संप्रति मरुत् कांतासु कांतायते ५० अयं शैशिरः मरुत् सं
प्रति इदानीं कांतासु स्त्रीषु कांतायते कांतमिव भवति तत्कथं केशानाक
लयन् दृशः दृष्टीः मुकुलयन् आच्छादयन् वासः वस्त्रं बलादाक्षि

भ·भं·गा·
१९

पत्तिः काशयन् पुलकाः रोमांचाः तेषामुद्गममातन्वन् विस्तारयन् आलिंगपशनैः कंपयन् प्रकटयन् वारंवारमुदाराणि बहूनि सीत्कृतानि कारयंति दं[illegible]दान् ओष्ठान् पीडयन् एवंप्रायः कांत एव भवति इति रूतु न [illegible] रतिकामिनां विषयिणां मनोरथ स्तथापि इति भावः कथं तेषां कर्तव्यतानि ज्ञात्वा त्यक्तव्यानि च इति करणाद् उक्तानि अधुनापन्न द्वय निरूपणं ५० अर्थार संत्वेते विरतिविरसायासविषयाजुगुप्संतायद्वान नु सकलदोषास्पदमिति तथापि तत्स्वत्वेप्रणिहितधियामप्यतिबलस्तदीयो नाख्येयः स्फुरति हृदये कोमपि महि

१९

मा ५१ यतयस्मात्कारणात्वाइतिविकल्पेनमनुइतिवितर्केइदंस
कलदोषास्पदमितिजुगुप्सां तांनिंदांकुर्वंतांएतांएते विरतिविरसावैरा
ग्येविरसाः वैराग्येअभ्यासाः एवंभूताविषयाः असाराः निःसाराः संतुत
यापितत्वेप्रणिहितधियांकृतबुद्धीनामपितदीयाः तस्यास्थितः अयंतदी
यः कोपिमहिमाअतिवलः वलवानननआरव्येयः वक्तुमशक्यः स्फुटमिद
दमेवाश्चर्यं ५१ भवंतोवेदांतप्रणिहितधियामाप्तगुरवोविरम्यालापा
नांवयमपिकवीनामनुचराः तथाप्येवत्रूमोनहिपरहितात्पुण्यमधि
कंनचास्मिन्संसारेकुवलयदृशोरम्यमपरं ५२ भवंतोयूयंवेदांतेनिहि

भ॰शृ॰गा॰ ताबुद्धियैस्तेषामात्ताश्चागुरवश्चवयंतुविदग्धा आलापाः शब्दायेषांतथा
२० भूतानामनुचराः सेवकास्तथापिनहिपरहितात्सुरापमधिकं एतु भूमौ अ
स्मिन्संसारेकुवलयदृशः अपरंरम्यंनास्तिइतिजानीयः ९२ किमिहवहुभि
रुक्तैर्युक्तिःशून्यैःप्रलापैर्द्वयमिहपुरुषाणांसर्वदासेवनीयं अभिनवम
प्रे॰ दलीलालसंसुंदरीणांस्तनभरपरिखिन्नंयौवनंवावनंवा ९३ इहलोके
४ वहुभिरुक्तैर्वचनैः किंप्रयोजनं कथंभूतैरुक्तैः युक्तिशून्यैः प्रलापेअर्थवि
रहितैः तर्हिमयोच्यतेतत्छ्रूयतांइहपुरुषाणांपुरुषैर्द्वयंसर्वदासेवनीयंद्व
यंकिं अभिनवानूतनाअपूर्वामदस्यलीलायाताभिः सुंदरंसुंदरीणांस्त २०

नभरेणापवित्रंपौवनंसेवनीयंअथवावनंसेवनीयं ५३ सत्यंजनावच्मि नपक्षपातात्लोकेषुसर्वेषुचतथ्यमेतत् नान्यन्मनोहारिनितंविनीभ्योदुः खैकहेतुर्नचकश्चिदन्यः ५४ भोजनाः अहंसत्यंवच्मिवदामिनपक्ष पातात्सर्वेषुलोकेषुइदमेततथ्यंयथार्थंतत्किंनितंविनीभ्यः स्त्रीभ्यः म नोहारिमनः संतुष्टिकरं अन्यद्द्वितीयंनास्तिविषयिणांपरमार्थिनांतुस्त्री भ्यः दुःखैकहेतुः दुःखस्यकारणमन्यन्नास्ति ५४ यावद्दुर्विरक्तमसंसा तावदेवचक्रतिनामपिस्फुरत्येषनिर्मलविवेकदीपकः यावदेवनकुरंगचक्षु षाता तेचपललोचनांचलैः ५५ स्पष्टः वचसिभवतिसंगत्यागमुद्दिश्य

उ.१

वार्त्ताश्रुतिमुखरमुखानांकेवलंपंडितानांजघनमरुणारत्नग्रंथिकांची
कलापंकुवलयनयनानांकोविहातुंसमर्थः ५६ श्रुतिमुखरमुखानां
व[illegible]वक्त्राणांपंडितानांकेवलंसंगत्यागमुद्दिश्यवार्त्ताभवतिनतुत्यागंकु
र्वंतिकिमितिकुवलयनयनानांकमलनयनानांस्त्रीणांरत्नानांग्रंथिकां
चीकलापंयस्मिन्तज्जघनंविहातुंत्यक्तुंकःसमर्थः नकोपीत्यर्थः ५६
स्वपरप्रतारकोसौनिंदतियोलीकपंडितोयुवतीःयस्मात्तपसोपिफलंस्व
र्गस्तस्यापिफलंतथाप्सरसः ५७ यःपंडितोयुवतीःनिंदतिसःस्वस्यापिप
रस्यापिप्रतारकःप्रतारणामात्रंअलीकंवृथाकरोतिकिमितियस्मात्कार

णात्तपसोपि फलं स्वर्गः तथा स्वर्गस्यापि फलमप्सरसः ५७ मत्तेभकुंभदल
ने भुवि संति शूराः केचित्प्रचंडमृगराजवधेपि दक्षाः किंतु ब्रवीमि बलि
नां पुरतः प्रसह्य कंदर्पदर्पदलने विरला मनुष्याः ५८ स्पष्टः सन्मार्गे ता
वदास्ते प्रभवति च नरस्तावदेवेंद्रियाणां लज्जां तावद्विधत्ते विनयमपि समा
लंबते तावदेव भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते यावल्ली
लावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ५९ नरस्तावत्सन्मार्गे स्था
स्ते इंद्रियाणां जेता तावत्प्रभवति समर्थो भवति तावल्लज्जां विधत्ते विनय
मपि तावत्समालंबते यावल्लीलावतीनामेते दृष्टिबाणाः हृदि न पतंति कथं

भ॰ श्रृं॰ गा॰

२२

भूतावाणाः भ्रूरेव चापो धनुः स्तेन या कटाक्षाः तेमुक्ताः पुनः श्रवणापथं गताः कर्णापर्यंतंगताः पुनः नीलवपक्ष्माणाः नीलानिनेत्रपक्ष्माणितए वपुंखपत्राः पुनः वतिं धैर्यं मुषंतिचोरयंतितेच्छतिमुषः ५५ उन्मत्तप्रे मसंरंभादारंभते यदंगनाः तत्र प्रत्यूहमाधातुं ब्रह्मापि खलुकातरः ६० उ न्मत्त विचारितं यत्प्रेमतस्य संरंभा[illegible]दादरात् यत्कार्यमंगना आरंभं ते तत्र प्रत्यूहं विपरीतं कर्तुं ब्रह्मापि खलु निश्चयेन कातरः असमर्थः ६० तावन्महत्वंपांडित्यंकुलीनत्वंविवेकता यावज्ज्वलतिनांगेषु खतः पंचेषु पावकः स्पष्टः शास्त्रतोपिप्रथितविनयोप्यात्मबोधोपिवाढं संसारेस्मिन्

भवतिविरलोभाजनंसद्गुतीनां येनैतस्मिन्निरयनगरद्वारमुद्घाट्या

टयंतीवामाक्षीणांभवतिकुटिलाभ्रूलताकुंचिकेव ६२ शास्त्रंचः प्रथि

तविनयश्चवाढमत्यंतमात्मवोधः ज्ञानीसद्गुतीनांभाजनंपात्रंएतादृशा

पुरुषः अस्मिन्संसारेविरलः कदाचित्कचित्भवतितर्हिसर्वेपितादृशा

कृतोनभवतितत्रकारणमस्तियेनकारणेनएतस्मिन्संसारेवामाक्षीणां

सुंदरनयनानांस्त्रीणांकुटिलावक्राभ्रूलताआकुंचिकाभवंतिआक

र्षणांकरोतिकथंभूताभ्रूलतानिरयस्यनगरस्यद्वारमुद्घाटयंतिउच्चा

रयंती ६२ क्वणः काणाः खंजः श्रवणारहितः पुच्छविकलोव्रणीयूपक्लि

भ॰ शृं॰ गा॰
२३

न्नः कृमिकुलशतैरावृततनुः क्षुधाक्षामो जीर्णः पिठरकपालार्पितग
लः शुनीमन्वेति श्वा हतमपि निहंत्येव मदनः ६२ कृशः काणः एकने
त्ररहितः खंजः एकपादेन हीनः श्रावणरहितः पुच्छविकलः व्रणी सर्वां
गव्रणाय स्य पूयेन क्लिन्नः लिप्तः कृमीणां कुलं वाहुल्यं तस्य शतैः आवृततनुः
क्षुधया क्षामः कृशीभूतः जीर्णो वृद्धः पिठरं मृन्मयपात्रस्य कपालं कंठः
तेन अर्पितगलः एतादृशः श्वा शुनीमनुपृष्ठतः एते अतो मदनः हतम
पि च आदौ शरीरावस्थयां तमाप्तः तं हंति मारयंति विवेको नास्ति इत्य
र्थः ६२ स्त्रीमुद्रां झषकेतनस्य जननीं सर्वार्थसंपत्करीं ये मूढाः प्रविहापयां

२३

तिकुधियो मिथ्याफलान्वेषिणः तेते नैव निहत्य निर्दयतरं नग्नीकृतामुं

डिताः केचित्पंचशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ६४ ॥ राज्ञोमुद्र

यासर्वं कार्यं भवति अतो मकरकेतनस्य मदनस्य स्त्रीमुद्रा भवति अनयासर्वं

भवति अतोमुद्रां विहाय यस्य कार्ये मूढाः कुधियः कुत्सितबुद्धयः यानिमि

थ्याफलानि स्वर्गादिकानि अप्रत्यक्षाणि तानि अन्वेषयंतितेमूर्खाः कथं

भूतां स्त्रीमुद्रां मदनस्य जनसीमुत्पादयंतीं सर्वार्थानां संपदं करोती ति यस्या

धीना मुद्रा तस्य सर्वा संपदो भवंति या मुद्रायाः उल्लंघनं करोति तस्य राजा दं

डकरो भवति मारयति च अतो मदनेन ते मूढास्तेनैव कर्मणा निहत्य निर्द

भ॰ वैराग्य॰
२४

यतरं यथास्यात्तथा नग्नीकृताः मुंडिताश्च केचित् पंचशिखीकृताः केचि
ज्जटिलाः अपरे कापालिकाः पात्रे करे धृत्वा भिक्षाटनं कारिताः राजापि
येनानयः कृतः तस्य एवमेव दंडं करोति ६४ विश्वामित्र पराशर प्रभृतयो
वातांबुपर्णाशनास्तेपि स्त्री मुखपंकजं सुललितं दृष्ट्वैव मोहं गताः शाल्यन्नं
सघृतं पयोदधियुतं भुंजंति ये मानवास्तेपि स्त्री मुखपंकजं सुललितं दृष्ट्वै
व मोहं गताः शाल्यन्नं सघृतं पयोदधियुतं भुंजंति ये मानवास्तेषामिंद्रिय
निग्रहो यदि भवेद्विंध्यस्तरेत्सागरे ६५ वातं च वायुं च अंबु उदकं च शुष्क
पर्णानि च अश्नंति भक्षयंतीति वातांबुपर्णाशनाः एवं भूता विश्वामित्र

२४

48

पराशरप्रभृतयः तेपि स्त्रीमुखपंकजं सुललितं सुंदरं दृष्ट्वैव दर्शनमा
त्रेण मोहं गताः प्राप्ताः किमुत यत् शाल्यन्नं तदुलोदनं तदपि सघृतं पु
नः पयोदधियुतं ये मानवा भुंजंति तेषामिंद्रियनिग्रहः वक्तव्येन कथं
भवेत् अत्र दृष्टांतः यदि विंध्याद्रिः सागरं तरेत् तदा पूर्वानामिंद्रियनि
ग्रहः इति दुर्विरक्तप्रशंसा ६५ अथ स्त्रीणां परित्यागप्रशंसा संसा
रेस्मिन्नसारे कुनृपतिभवनद्वारसेवावलंबव्यासंगव्यस्तधैर्यं कथ
ममलधियो नाम संसं विदध्युः यद्येताः प्रोद्यदिंदुद्युतिनिचयभृ
तो न स्युरंभोजनेत्राः प्रेंखत्कांचीकलापाः स्तनभरविनयमध्यभास्त

भ॰ श्रं॰ गा॰ रुशाप॰

२५

६६ प्रकर्षेण उच्चदंदंतीं द्युतीनां तेन सानिच यं समुच्चायं वि
भ्रतिताः प्रें खच्छ्वायमानं कांची कलापो यासांताः स्तनानां भरेण वि
मम्नः मध्यभागो यासांताः एवं भूता एताः अंभोजनेत्राः स्त्रियस्तरुणेपाम
स्तुर्न आसन् तर्हि अमत्वधियो मानवा अस्मिन् असारे संसारे कुन्पति
कुत्सितान् पतयस्तेषां भवनानां द्वाराणां सेवाया अवलंबेन व्यासंगस्तेन
व्यस्त धैर्य एवं मानसं मनः कथं विदध्युः कुर्युः एतस्य भावः यदि स्त्रि
यो न आसन् तदा बुद्धिमंतः राजसेवां न कुर्युः स्त्री निमित्तं राजसेवां न कु
र्वंते न व्यासंगेन मनः चंचलम धैर्यं भवति ६६ सिद्धाध्यासितकंदरे हर

२५

वृषस्कंधावगाढद्रुमे गंगाधौतशिलातले हिमवतः स्थाने स्थिते श्रेय
सि कः कुर्वीत शिरः प्रणाममलिनं मानं मनस्वी जनोपद्यत्र स्तकुरंग
शावनयनानस्मुः स्मरास्त्रं स्त्रियः ६७ यदि स्मरास्त्रं स्त्रियः नस्युः नम्रा
स्तदा हिमवतो हिमालयस्य स्थाने स्थित्वा कामेन स्वशिरः प्रणाममा
लिनं कुर्वीत कथंभूताः स्त्रियः अत्र स्थाये कुरंगशावास्तेषां नयनानीव न
यनानि यासां ताः कथंभूते हिमवतः स्थाने सिद्धैः अध्यासिता अधिष्ठिताः
कंदराः यस्य स्कंधेन दृशोतेन अवगाढा अवरुद्धा द्रुमा यस्मिन् पुनः गंगा
धौतानि शिलातलानि यस्मिन् पुनः श्रेयसि पुण्यरूपे अथ श्लोकस्य भा

51

वः प्रशस्तं शुद्धं मनो यस्य स समनस्वी जनः यस्य मनः शुद्धं तस्य अ
पेक्षा यदा मलिनं मनस्तदा तस्य शुध्यर्थं सा धनांतराणि कर्तव्यानि ॥
संप्रति मनो मलिनं स्त्रीभिरेव क्रियते अतः स्त्रीणां प्रभावा एव तु स्पन्नान
स्युः तदा मनोपि मलिनं नैव भवेत् तदा मनस्वी जनः हिमवतस्यानेगला
खशिरः प्रणामेन किमर्थं मलिनं करिष्यति मलिनतायाः कारणं स्त्रीरेव
स्त्रीभरनस अस्वंयस्यांगेसंलगति समूर्छितो भवति ६७ संसारतवनि
स्तारपदवीनदवीयसी अंतरादुस्तरानस्युर्मदिरं मदिरेक्षणाः ६८ रेसं
सारयदि अंतरालम्मध्ये मदिरे [illegible] क्षणाः स्त्रियो दुस्तरानस्युः नासनतदा

वनिस्तारपवीस्थितिः दवीयसी दीर्घा चैव इति स्त्रीणां परिन्याज्यविधिः

६८ अथयौवनप्रशंसा राजन्तस्मिंबराशेर्न दि जगति गतः कश्चिदेवा

वसानंकोवार्थैरर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे गच्छ मठसद्म

यावद्विकसितकुमुदेंदीवरालोकनीनामाक्रम्यरूपं ऊ टिति नकुरयालु

प्तते प्रेयसीनां ६५ भोराजन्नरह जगति कश्चिदेवतस्मिंवुराशेः तस्मसमु

द्रस्य अवसानंपारं नहि गतः स्ववपुषियौवनेच सानुरागे यतिप्रियेगलिते स

तिप्रभूतैः पुष्कलैः अर्थैर्द्रव्यैः कोवार्थः प्रयोजनं अतस्तावत् विकसितानि

नयनानिवइंदीवराणि तैः प्रयोजनं आलोकिंतु इष्टुंशीलं यासांतासां प्रेय

म. श्रृं. गा.
२७

सीनांप्रियाणांसद्मगृहंप्रतिगच्छामः यावज्जरया तासां रूपमाक्रम्य आक्रे
म्यकटिति शीघ्रं नलुप्यते ६९ रागस्यागारमेकं नरकशतमहादुःखसं
संप्राप्तिहेतुर्मोहस्योत्पत्तिवीजंजलधरपटलंज्ञानताराधिपस्याकंदर्प
स्यैकमित्रंप्रकटितविविधस्पष्टदोषप्रबंधंलोकेस्मिन्नह्यनर्थनिजकु
लदहनं यौवनादन्यदस्ति ७० अस्मिन्लोकेयौवनात्तारुण्यादन्यत्द्विती
यमनर्थकरंनास्ति कथंभूतंयौवनं रागस्यइच्छायाएकमागारंगृहं नर
काणांशतानितेषुमहादुःखानितेषांप्राप्तिः तस्याहेतुः कारणं मोहस्योत्प
तिः तस्याः बीजं ज्ञानलक्षणतारास्ताराधिपस्यचंद्रस्यजलधरपटलप्राच्छाद

२७

कं कंदर्पेमदनस्तस्य एकं मित्रं प्रकाशितं विविधा नानाप्रकारा दोषास्य
ष्टास्तेषां प्रवं धंस्वना निजं स्वकीयंकुलंतस्य दहनं दाहकं एवं यौवनं
निंद्यमस्ति ७० शृंगारद्रुमनीरदे प्रचुरताक्रीडारसस्रोतसि प्रद्युम्न
प्रियबांधवे चतुरतामुक्ताफलोदन्वति तन्वीनेत्रचकोरपारणविधौ
भाग्यलक्ष्मीनिधौ धन्यः कोपिन विक्रियांकलयति प्राप्ते नवे यौवने ७१
यः नवे यौवने तारुण्ये प्राप्ते सति विक्रियां विकारं न कलयति नकरो
ति स धन्यः पूज्यः कथंभूते यौवने शृंगारा एव द्रुमास्तेषां नीरदे ज
लदे यथा जलप्राप्तौ वृक्षाः शोभंते तथा यौवने न शृंगाराः शोभन्ते प्रचुर

म·रंगा·
२८

क्रीडानां रसास्तेषां स्रोतसि सेतौ प्रद्युम्नो मदनस्तस्य प्रिये वा धवे वंधौ
चतुरं तालस्त्र णानि मुक्ताफलानि वेषां मुदन्वति समुद्रे तन्वी सुंदरा स्त्री
तस्या नेत्रे एव चकोरे तयोः पारणा तस्य विधौ विधाने सौभाग्यलक्ष्मीनि
धौ स्थापन प्रशंसा ७१ अथ कामिनी गर्हणं कांते सुतुत्पललोचने ति
विपुल श्रोणि भरे सुतुकः पीनोत्तुंगपयोधरे ति सुमुखांभोजे ति सुभ्रू रिति
दृष्ट्वा माद्यति मोदते विरमते प्रस्तौति जानन्नपि प्रत्यक्षामृचि पुत्रिकां स्त्रि
य महो मोहस्य दुश्चेष्टितं ७२ पुरुषः स्त्रियं प्रत्यक्षामशुचीनां पुत्रिको
जानन्नपि उत्सुको निर्मर्याद्यो भवति तां दृष्ट्वा माद्यति समदो भवति मो

२८

इते चटुर्षप्राप्नोति रमते च वर्तते स्तौति इवि इति कथं तस्या अभिधानं गरुत्ला
सिकांते सुंदरे उत्पललोचने विपुलश्रोणीभरे कटिप्रदेशो यस्याः सापीनौ
मांसलौ ठन्तुंगौ उच्चौ पयोधरौ यस्याः सा एषुमुखां भोजं यस्याः सा एवम
भिधानानि गृहीत्वा स्तौति अहो इति आश्चर्यमिदं मोहः खलु श्रेष्ठिं ॥
७२ स्नुता भवति तापाय दृष्टा चोन्मदवर्द्धिनी स्पृष्टा भवति मोहाय सा मा
न दयिता कथं ७३ स्पृष्टा वदेवा मृतमयी यावल्लोचनगोचराः चक्षुः
पथादयगता विषादप्यतिरिच्यते विषादतिरिच्यते अधिका भवति ७४
नामृतं न विषं किंचिदेकां मुक्त्वा नितंबिनीं सैवामृतलता रक्ता विरक्ता विष

भ॰ श्टंगा॰
२९

वल्लरी ७५ स्पष्टः आवर्त्तः संशयानामविनयभवनंपट्टनं साहसानांदो
षाणां संन्निध्यानं कपटशतमयं चेचमस्त्वत्ययानां स्वर्गद्वारस्यविघ्नं
नरकपुरमुखंसर्वमायाकरंडुस्त्री यंत्रं केन सृष्टं विषमममृतमयंप्राणि
नांमोहपाशः ७६ लोकेयंत्राणि संतितैर्मारणाउच्चाटनवशीकरणादि
क्रियाः क्रियंते अतः स्त्रीयंत्रंकेनब्रह्मणासृष्टं निर्मितं कथंभूतं संश
यानामावर्त्तः परस्त्रीस्वभावेन सत्त्ववत्यापि स्थितश्चेत इतरे संशयंकु
र्वंतिपुनः दोषाणांसन्निधानं सर्वेदोषास्तत्सन्निधानेन भवंति अभक्ष्या
णामगुणानांक्षेत्रं स्वर्गद्वारस्यविघ्नंनाशनशीलं नरकाणांयत्पुरंतस्यमुखं २९

सर्वासां मायानामस्ती लाकांकरंडंस्यापनपात्रं एणदृशं स्त्रीयंत्रं प्राणिनो
मोहपाशो भवति ७६ नासत्येन शशांक एष न वदनी भूतेन चंदीवरं द्वंद्वेलो
चनतां गतेन कनके रप्यंगयष्टिः कृता किं त्वेवं कविभिः प्रसारितमनास्त
त्वं विजानन्नपि तत्त्वांसास्थिचयं वपुर्मृगदृशां मंदोजनः सेवते ७७ ए
षः शशांकः सत्यत्वेन वदनी भूतेनैव न वइंदीवरद्वंद्वेन सत्यत्वेन लोचन
तां गते कनकैः सुवर्णैरपि सत्यत्वेन अंगयष्टिः कृता नैव किंतु एवमुक्तप्र
कारेण कविभिः उपमादत्ता तया प्रतारितमनास्तत्वतो जानन्नपि मंदो ज
नः मृगदृशां त्वक्मांसअस्थिप्रचुरं वपुः सेवते ७७ लीलावतीनां सहजाविं

59.

भ॰ शृं॰ गा॰
३०

लासास्त एव मूढस्य हृदि स्फुरंति रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्र
मत्येव मुधा षडङ्घ्रिः ७४ स्पष्टः यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृति
वरं मुखाब्जं तन्वंग्याः किल वसति तत्राधरमधु इदं तावत्पाकं द्रुमफल
मिवातीव विरसं व्यतीतेस्मिन्काले विषमिव भविष्यत्यसुखदं ७५ य
त यस्मात्कारणात् पूर्णेन्दुः तस्य द्युतिस्तेजः तत् हरति द्युतिमदुराश्राकृ
तिर्यस्य तत् वरं श्रेष्ठं एवं तन्वंग्या मुखाब्जे तत्र अधरमधु वसतीति कि
ल श्रूयते इदं तावत्पाकद्रुमस्य फलं अस्मिन्काले यौवनेऽतीते अ
तिक्रमिते सति वा निरसं विषमिवासुखदं भविष्यतीति यथा पाकद्रुम ३०

स्यफलंतत्तत्कालोपचितंचेतरसवत्तनोचेत्कालातिक्रमेणातन्नश्यतिवि
षमिवभवतितथातरुणपामुखमपि ७९ उन्मीलत्त्रिवलीतरंगनिलया
प्रोत्तुंगपीनस्तनद्वंद्वेयतचक्रवाकमिथुनावक्रांबुजोद्भासिनी कांता
कारधनानदीपमथितः क्रूराशयानेष्यतेसंसाराणवमज्जनंयदितता
दूरेणासंत्यज्यतां ८० कांतानामनदीकलाउभंयोःसादृश्यांवर्णयतेउन्मी
लत्त्रिवलीरोमावल्यःतएवतरंगास्तेषांनिलयंस्थानंयस्याःसाप्रकर्षेणाउ
त्तुंगंउच्चंपीनंमांसलंस्तनद्वयंतदेवउद्धतंसचक्रवाकंयस्यांसा वक्त्रमे
वांबुजंतेनउद्भासिताशोभायमानाएवंभूताइयंकांताकारधरानदीइय

भितः समंततः क्रूरः आशयः अभिप्रायो यस्य सा सा वर्त्तते हे जनाः यदि
भवतां संसारार्णवमज्जनं न रुच्यते इच्छा नास्ति तर्हि भवद्भिः इयं दूरेण संत्य
ज्यतां ८० अल्पं मूतिसार्द्धमन्येन पश्यंतन्मंससविभ्रमाः हृदये चिंतयंत्यन्यं
प्रियः को नाम योषितां ८१ स्पष्टः अपसर वेद्दूरादस्मात्कटाक्ष विशिखा
नलात् प्रकृति विषमा द्योषित्सर्पाद्विलासफणाभृतः इतरफणिना दष्टाः
शक्या श्चिकित्सितुमौषधैश्चतुरवनिता भोगग्रस्तं त्यजंति हि मंत्रिणः
८२ हे सखे अस्मात् योषित्सर्पात् दूरादपसरणं च्छा कथंभूतात्सर्पात् कटा
क्ष एवं विशिखो वाणः तस्य अनलः अग्निर्यस्मिन् तस्मात् पुनः प्रकृत्या स्व

भावेन देहेन वा कुटिला वक्रा तत् पुनः विलासा एव फणा बिभर्त्ति तस्मा
त् किमित्युच्यते इतरत्फणिना सर्पेणा दष्टः औषधेश्चिकित्सितुं शक्यते
चतुरवनिताभोगग्रस्तं मं त्रिशो हि इति निश्चयेन त्वत्रं वि अतो दू
रादेव अपसर ८२ विस्तारिता मकरकेतनमधीवरेण स्त्री संज्ञितं वडिश
मत्र भवांबुराशौ येना चिरात् तदधरामिषलोलमर्त्यमत्स्यात् विकृष्य पचती
त्यनुरागवह्नौ ८५ मकरकेतनेन मदनेन मदनेन धीवरेण कैवर्तकेन अ
त्र भवांबुराशौ भवसमुद्रे स्त्री संज्ञितवडिशजाल विस्तारितं प्रसृतं किमर्थं ये
न [illegible] वडिशेन अचिरात् स्त्वरात् तस्याः स्त्रियाः अधररावद्यामिषं तस्मिन् लो

63

भ·शृंगा· ३२

त्वा: सत्त्वस्मायेमर्त्यमत्स्याः वान् विकष्य अनुरागप्रीतिः स एव वह्निः तस्मि
न्पचति ॥५॥ कामिनीकायकांतारे कुचपर्वतदुर्गमे मा संचर मनः पां
थ तत्रास्ते स्मरतस्करः ॥४॥ स्पष्ट व्याः दीर्घेणाचलेन वक्रगतिनातेज
स्विना भोगिना नीलाब्जद्युतिनाहिना वरं महं दष्टो न तच्चक्षुषा दष्टाः सं
ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो मुग्धाक्षीक्षणवीक्षितस्य
न हि मे वैद्यो न वाप्यौषधं ॥४॥ तच्चक्षुषा तस्याः चक्षुषा अहिता अहं
न दष्टः स्यः वरं श्रेष्ठं उत्तमं कथं भूतेन विशेषेण आदीर्घेणाचलेन चंचलेन
वक्रगतिनातेन विना भोगिना अरे भोगीनाम फणा विद्यते चक्षुषः नाना ३२

भोगाभवं तिनीलमभंतस्य द्युतिर्यस्य तेन इतरश्च हृदि दृष्टे: दिशिदिशि
प्रायशो धर्मार्थिनो चिकित्सका: संति परंतु मुग्धा द्दीतस्या: च्चगांवीचित
स्य मे वैद्यो नास्ति औषधमपिनास्ति ॥४५॥ हे हिमधुरगीतं न्नत्वमेतद्दसो
यं स्फुरति परिमलो सो स्पर्श एष स्तनानां इति हृत परमार्थैरिंद्रियैर्भ्राम्य
मारोगाद्य हितकरराद् चैः पंच भिर्वंचितोसि इहलोके मधुरगीतं कर्ण
योर्विषय: न्नत्वं नेत्रयोर्विषय: अयं रस: रसनाया विषय: अस्रो परिमल:
स्फुरति घ्राणस्य विषय: एष स्तनानां स्पर्श: स्पर्शस्य विषय: इति पंचे
द्रियाणां पंच विषया: हे तन त्वमेभि: पंचभीरिंद्रियै: भ्राम्यमाणा: त्वन्नवं

चितोसि कथंभूतैरिंद्रियैर्हृतः नाशितः परमार्थैः यैः पुनः अहितंनरका
दिकंतस्यकैरोगरत्नैः ९६ नगम्योमंत्राणांच भवति भैषज्यविषयोन
चापिप्रध्वंसंव्रजतिविविधैः शांतिकशतैः भ्रमम्भेशादंगे किमपिवि
धद्धगयस्यमुस्मरोयं भ्रमयतिदृशंघूर्णयतिच ९७ अपस्मारः मदनः
अपस्मारोवर्त्तते अपस्मारनिवारणार्थमुपायाः संतितेकर्त्तव्याः इतिचे
त्तर्हि अपंतथानभवतिअयंकथंभूतः मंत्राणांनगम्यः नचभैषज्यविष
यःपुनः विविधैरनेकप्रकारैः शांतिकशतैः नचापिप्रध्वंसंव्रजतिनाशं
नाप्नोति अथच भ्रमस्यआवेशाघूर्णयतिच ९७ जातंधायचद्गुमुख्वा

यच जराजीर्णाखिलांगाय च ग्रामीणाय च दुःकुलाय च गलत्कुष्ठाभिभू
ताय च यच्छंती षु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धयाप सप्त स्त्रीषु विवेक
कल्पलतिकाशस्त्रीषु रज्येत कः ॥ २६ ॥ पण्य स्त्रीषु वेश्यासु कः रज्येत इष्यं
कुर्वीत कथंभूतासु जात्यंधाय च दुर्मुखाय च जरया जीर्णानि आखिलानि अं
गानि यस्य तस्मै ग्रामीणाय एवमादिभ्यो लक्ष्मीलवश्रद्धया अल्पद्रव्यप्राप्त्य
र्थं मनोहरं सुंदरं निजं स्वकीयं वपुः शरीरं भ्रमतु राय च दुःकुलं निंद्यकुलं तत्र
उत्पन्नाय च गलत्कुष्टेन अभिभूताय पीडिताय + रंपयच्छंतीषु पुनः कथंभूतासु
विवेक एव कल्पलतिका कल्पवल्ली तस्याः शस्त्रीषु शसुरसु भूतासु छेदका

अ॰ रंगा॰
३४

सु २८ वेश्या सो मदनज्वालारूपे घनसमिधि चिता कामिभिर्यत्र हूयंते यौवनानि धनानि च ॥ २८ ॥ स्पष्टः कश्चुवतिकुलपुरुषो वेश्याधरपल्लवमनोज्ञमपि चारभटचोरचेटकनटविटनिष्ठीवनशरावं ॥ २९ ॥ कुलपुरुषः सन् कोवा मनोज्ञसुंदरमपि वेश्याधरपल्लवं चुंवति अ॰ कुलीनः चुंवति कलपुरुषस्तु नैव किमिति कथंभूतं वेश्याधरपल्लवं चारो हेरः भटः भाट्टः चोरः चेटकं करोति स चेटकः नर्तक विटः भांडः इत्यादीनां निष्ठीवनं लालोटकं तज्जाते तस्य शरावं पात्रं एवं निंद्यं ॥ २९ ॥ इतिकामिनीनिगर्हणं अथ सुविरक्तप्रशंसा धन्यास्त एव धवलायतलोचनानां तारुण्यरूपघनपीनपयो

३४

२९

धाराणां क्षामोदरोपरिमलरसस्त्रिवलीलतानां दृष्ट्वाकृतिमेतिमनोन
येषां ५२१ तएव धन्याः मनः चपलानिश्चायतानि विस्तीर्णानिलो
चनानि यासां तासां आकृतिरूपं दृष्ट्वा विकृतिं क्षोभं न एति कथंभूता
नां तारुण्यरूपं घनोपि नो [illegible] सलोस्तनोपयोधरयो यासां पुनः क्षामं
कृशमुदरं तस्योपरि लसंत्यः शोभायमानाविवलयो यासां ५२ वा
लेलीलामुकुलितममीसुंदराद्दृष्टिपाताः किं क्षिप्यंते विरम विरम
व्यर्थ एषः श्रमस्ते संप्रत्यन्येव यमुपरतं वाल्यमास्यावनांतेक्षीणमो
हस्तृणामिव जगज्जालमालोकयामः ५२२ हे बाले बयालीलयामुकुलि

क २

भ॰ष्टंगा॰ मस्पष्टंयथास्यात्तथा अमीसुंदराः दृष्टिपाताः किमर्थंत्तिप्यंतेत्वजंते
३५ संप्रतिअधुनातेतवएषश्रमःव्यर्थः निरर्थकः किमितिवयमन्येपूर्वे
नभवामः इदानीमस्माकंबाल्यमुपरतं अज्ञानंगतं वनांतेआस्पाउ
त्पन्नामोहः क्षीणः इदंजगज्जालंतृणमिव आलोकयामः आतोविर
मंविरमविरामंप्राप्नुहि ५२ चक्रिकांयासाधूनवत्वान्विदुषोमूर्खाहि
तान्द्वेषिणः अमतेहालाहलंकुरुते ५६ गुणावद्गुणवज्ञाकुर्वता
कार्यमादौपरिणतिरवधार्यायत्नतःपंडितेन अतिरभसकृतानांकर्म
णामाविपत्तेर्भवतिहृदयदाहीशल्यतुल्योविपाकः ५७ गुणावद्गुणेयु ३५

तं अथवा अगुणावत् कार्यं कुर्वत् कर्त्तुमिच्छता पंडितेन विवेकिना आ
दौ पूर्वमेव यत्नतः प्रयत्नात् तस्य कार्यस्य च परिणतिः प्रांतः अवधार्या वि
चारणीया कर्त्तुं शक्यं प्रातः शुशु इति आदौ विचार्य कर्त्तव्यं अन्यथा अतिर
भसानां रभसत्वादेन कृतानां कर्मणां विपाकः प्रांतः फलं आविपत्तेः मरणा
पर्यंतं हृदयदाही शल्यतुल्यो भवति ५७ स्यात्स्यां वैदूर्यमय्यां पचति तिल
कणांश्चंदनैरिंधनाद्यैः सौवर्णो लांगलाग्रे विलिखति वसुधामर्क मूलस्य
हेतोः स्थित्वा कर्पूरखंडान् वृतिमिह कुरुते कोद्रवाणां समंतात् प्राप्यैमां क
र्मभूमिं न चरति मनुजो यस्तपो मंदभाग्यः ५८ मनुजो मनुष्यः इमां कर्मभू

भ॰शृं॰गा॰ ३६

मिंप्राप्य यस्तपः सुधर्मे निष्ठां सत्क्रियां न चरति स मंदभाग्यः खहितं न जानाति अत्र दृष्टांतः यथा वैदूर्यमणिरत्नावलितां सुवर्णस्थालीं प्राप्य तस्यां तिलाश्यां खलिं चंदनकाष्ठैः पचति व्यर्थं करोति यथा च सुवर्णलांगलाग्रैः हलैर्वसुधां पृथ्वीं विलिखति भूमिं श्रद्धां करोति किमप्यर्कमूलस्य हेतोः अर्कवृक्षाणां रोपणां रोपणार्थं यथा कर्पूरखंजनं कर्पूरवृक्षान् छित्वा तत्र समंतात् कोद्रवाणां वृत्तिं रोपणां कुरुते तथा इमां भूमिं प्राप्य तपस्त्यक्त्वा विषयभोगान् भुंक्ते ४८ नैवाकृतिः फलति नैव कुलं न शीलं विद्यापि नैव न च यत्नकृतापि सेवा भाग्यानि पूर्वतपसा खलु संचितानि ३६

श्री ...

२५

कालेफलंतिपुरुषस्य यथैवव्रत्नः ८९ स्पष्टः मज्जवंभसियातुमे
रुशिखरंशत्रून्जपस्वाहवेवाणिज्यंकृषिसेवनादिसकलाविद्याःक
लाःशिक्षिताः आकाशंविपुलंप्रयातुखगपुत्रत्वात्मयत्नोमहान्नाभा
व्यंभवतीहकर्मवशतोभाव्यस्यनाशःकुतः ९० अंभसिमज्जतुमेरुशि
खरंयातुआहवेयुद्धेशत्रून्जयतुवाणिज्यात्कृषिसेननादिसकलाः
विद्याःकलाश्चशिक्षतु अभ्यासंकरोतुविपुलंपुष्कलंआकाशंयातुग
च्छतुखगवत्पक्षिवत्एतादृशंनानाविमज्ञानमासीत् तदासर्वमिदम
शेषंजगत्नारीमयंनारीप्रचुरमभूत्इदानीमधुनाअस्माकमतिशये

भ॰ शृं॰ गा॰
३७

नपटुः विवेक एव अंजनं तेन युक्तादृष्टिर्येषामस्माकं दृष्टिः समीभूवा
समतां प्राप्ता त्रिभुवनमपि ब्रह्म मनुते मानयति इति सुतरां विरक्तः सुवि
रक्तप्रशंसा ९५ इदं शृंगारशतं भर्तृहरिणा कृतं तत्का मबुध्यानकृतं
आदावेव आरंभे समस्तभावैः खलु बंधनं स्त्रिय इत्युक्तं मध्येपि दुःखै
कहेतुर्न हि किंचिदसि इत्यादीनि वचनानि मूले स्थितानि तासां कामिनी
नां प्रशंसा कामिभिः क्रियते सालिखिता ग्रंते सर्वं विवेक दृष्टानि निं
दितं ९८ वैराग्ये संचरत्येको नीतौ भ्रमति चापरः शृंगारे रमते का
श्चिद्भुवि भेदः परस्परं ९९ स्पष्टः यद्यस्य नास्ति रुचिरं तचास्यास्पृहा ३७

२८

भ॰ शृंग॰ ३०

मनोज्ञेपि रमणीये पि सुधांशौ न मनः कामः सरोजिन्याः यस्य यत्र रु
चिर्नास्ति तत्र मनोज्ञे पि सुधांशो अस्य हा भवति अत्र दृष्टांतः चंद्रस्तु
सर्वेषां प्रियकरः रमणीयः तस्मिन्सूर्यस्य दरे विकाशिन्याः सरोजिन्याः
मनसः कामः प्रीतिर्न नैव भवति एवं यस्य यत्र प्रीतिः तस्य तद्रुचिकरं
अतो नीतिशृंगारस्त्रवैराग्यं च उक्तं एतेषु यस्य प्रीतिस्तेन तत्तद्दृष्टव्यं
१०० इति श्री भर्तृहरिणा विरचितं शृंगार पातं समाप्तम् शुभमस्तु ॥
वैशाखमासे शुक्लपक्षे त्रयोदश्यां रविवासरे ॥ संवत ॥ १८ ॥ ४८ ॥ ३८

नसमरसा ऽ ईं १४१८ । यतिः हरिलालजुतिः धर्न

पुस्तकं गंगाधरस्य

[OrderDescription]
,CREATED=01.10.20 10:34
,TRANSFERRED=2020/10/01 at 10:45:07
,PAGES=76
,TYPE=STD
,NAME=S0003794
,Book Name=M-1729-SHRINGAR SHATAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF